@ayurveda_Sidhi @ayurveda_Sidhi Clinical Ayurveda !

# स्त्रोतोदुष्टि हेतू लक्षण व चिकित्सा

-मंगेश सं.तापकीर

# स्त्रोतस परिभाषा :

स्त्रवणात स्त्रोतांसि||

# स्त्रोतस पर्याय :

स्त्रोतांसि, सिराः, धमन्यः, रसायन्यः, रसवाहिन्यः, नाड्यः, पन्थानः, मार्गाः, शरीरच्छिद्राणि, संवृतासंवृतानि, स्थानानि, आशयाः, निकेताश्चेति शरीरधात्ववकाशानां लक्ष्यालक्ष्याणां नामानि भवन्ति|

# स्त्रोतस भेद/प्रकार/संख्या :

यावन्तः पुरुषे मूर्तिमन्तो भावविशेषास्तावन्त एवास्मिन् स्त्रोतसां प्रकारविशेषाः|

# स्त्रोतोदुष्टी संप्राप्ती :

तेषां प्रकोपात् स्थानस्थाश्चैव मार्गगाश्च शरीरधातवः प्रकोपमापद्यन्ते, इतरेषां प्रकोपादितराणि च|

स्त्रोतांसि स्त्रोतांस्येव, धातवश्च धातूनेव प्रदूषयन्ति प्रदुष्टाः|

तेषां सर्वेषामेव वातपित्तश्लेष्माणः प्रदुष्टा दूषयितारो भवन्ति, दोषस्वभावादिति||

# आचार्यानुसार स्त्रोतस प्रकार

| चरकाचार्य | सुश्रुताचार्य |
|---|---|
| प्राणवह स्त्रोतस | प्राणवह स्त्रोतस |
| उदकवह स्त्रोतस | उदकवह स्त्रोतस |
| अन्नवह स्त्रोतस | अन्नवह स्त्रोतस |
| रसवह स्त्रोतस | रसवह स्त्रोतस |
| रक्तवह स्त्रोतस | रक्तवह स्त्रोतस |
| मांसवह स्त्रोतस | मांसवह स्त्रोतस |
| मेदोवह स्त्रोतस | मेदोवह स्त्रोतस |
| अस्थिवह स्त्रोतस | मुत्रवह स्त्रोतस |
| मज्जावह स्त्रोतस | पुरिषवह स्त्रोतस |
| शुक्रवह स्त्रोतस | स्वेदवह स्त्रोतस |
| मुत्रवह स्त्रोतस | आर्तववह स्त्रोतस |
| पुरिषवह स्त्रोतस | |
| स्वेदवह स्त्रोतस | |

# स्त्रोतोदुष्टि हेतू, लक्षण, चिकित्सा

| | |
|---|---|
| स्त्रोतस | **प्राणवह स्त्रोतस** |
| मूल | तत्र प्राणवहानां स्त्रोतसां हृदयं मूलं महास्त्रोतश्च\| |
| कारण | क्षयातसंधारणादरौक्ष्यादव्यायामातक्षुधितस्यच\|<br>प्राणवाहीनीदुष्यन्तिस्त्रोतन्सिअन्यैश्चदारुणा \|\| |
| लक्षण | तत्र प्राणवहानां स्त्रोतसां हृदयं मूलं महास्त्रोतश्च, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा- अतिसृष्टमतिबद्धं कुपितमल्पाल्पमभीक्ष्णं वा सशब्दशूलमुच्छ्वसन्तं दृष्ट्वा प्राणवहान्यस्य स्त्रोतांसि प्रदुष्टानीति विद्यात्\|\| |
| चिकित्सा | श्वास् रोग समान चिकित्सा |

| | |
|---|---|
| स्त्रोतस | **उदकवह स्त्रोतस** |
| मूल | उदकवहानां स्त्रोतसां तालुमूलं क्लोम च\| |
| कारण | औष्ण्यादामाद्भयात् पानादतिशुष्कान्नसेवनात्\|<br>अम्बुवाहीनि दुष्यन्ति तृष्णायाश्चातिपीडनात्\|\| |
| लक्षण | प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा- जिह्वाताल्वोष्ठकण्ठक्लोमशोषं पिपासां चातिप्रवृद्धां दृष्ट्वोदकवहान्यस्य स्त्रोतांसि प्रदुष्टानीति विद्यात्\|\| |
| चिकित्सा | तृष्णा व्याधीची चिकित्सा |

| | |
|---|---|
| स्त्रोतस | **अन्नवह स्त्रोतस** |
| मूल | अन्नवहानां स्त्रोतसामामाशयो मूलं वामं च पार्श्वं \| |
| कारण | अतिमात्रस्य चाकाले चाहितस्य च भोजनात्\|<br>अन्नवाहीनि दुष्यन्ति वैगुण्यात् पावकस्य च\|\| |
| लक्षण | अन्नवहानां स्त्रोतसामामाशयो मूलं वामं च पार्श्वं, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा-<br>अनन्नाभिलषणमरोचकविपाकौ छर्दिं च दृष्ट्वाऽन्नवहान्यस्य स्त्रोतांसि प्रदुष्टानीति विद्यात्\|\| |
| चिकित्सा | लंघन व आमदोष नाशक चिकित्सा |

| | |
|---|---|
| स्त्रोतस | **रसवह स्त्रोतस** |
| मूल | रसवहानां स्त्रोतसां हृदयं मूलं दश च धमन्यः\| |
| कारण | गुरुशीतमतिस्निग्धमतिमात्रं समश्नताम्\|<br>रसवाहीनि दुष्यन्ति चिन्त्यानां चातिचिन्तनात्\|\| |
| लक्षण | अश्रद्धा चारुचिश्चास्यवैरस्यमरसज्ञता\|<br>हृल्लासो गौरवं तन्द्रा साङ्गमर्दो ज्वरस्तम:\|\|<br>पाण्डुत्वं स्त्रोतसां रोधः क्लैब्यं सादः कृशाङ्गता\|<br>नाशोऽग्नेरयथाकालं वलयः पलितानि च\|\|<br>रसप्रदोषजा रोगा\|\| |
| चिकित्सा | लंघन चिकित्सा |

| | |
|---|---|
| स्त्रोतस | **रक्तवह स्त्रोतस** |
| मूल | शोणितवहानां स्त्रोतसां यकृन्मूलं प्लीहा च\|\| |
| कारण | विदाहीन्यन्नपानानि स्निग्धोष्णानि द्रवाणि च\|<br>रक्तवाहीनि दुष्यन्ति भजतां चातपानलौ\|\| |
| लक्षण | कुष्ठवीसर्पपिडका रक्तपित्तमसृग्दरः\|<br>गुदमेढ्रास्यपाकश्च प्लीहा गुल्मोऽथ विद्रधिः\|<br>नीलिका कामला व्यङ्गः पिप्लवस्तिलकालकाः\|<br>दद्रुश्चर्मदलं श्वित्रं पामा कोठास्रमण्डलम्\|<br>रक्तप्रदोषाज्जायन्ते\|\| |
| चिकित्सा | रक्तपित्त नाशक चिकित्सा,विरेचन ,रक्तमोक्षन ,उपवास |

| | |
|---|---|
| स्त्रोतस | **मांसवह स्त्रोतस** |
| मूल | मांसवहानां च स्त्रोतसां स्नायुर्मूलं त्वक् च\| |
| कारण | अभिष्यन्दीनि भोज्यानि स्थूलानि च गुरूणि च\|<br>मांसवाहीनि दुष्यन्ति भुक्त्वा च स्वपतां दिवा\|\| |
| लक्षण | अधिमांसार्बुदं कीलं गलशालूकशुण्डिके\|<br>पूतिमांसालजीगण्डगण्डमालोपजिह्विकाः\|\| |
| चिकित्सा | शस्त्र,क्षार,अग्नि कर्म |

| | |
|---|---|
| स्त्रोतस | **मेदोवह स्त्रोतस** |
| मूल | मेदोवहानां स्त्रोतसां वृक्कौ मूलं वपावहनं च\| |
| कारण | अव्यायामाद्दिवास्वप्नान्मेद्यानां चातिभक्षणात्\|<br>मेदोवाहीनि दुष्यन्ति वारुण्याश्चातिसेवनात्\|\| |
| लक्षण | निन्दितानि प्रमेहाणां पूर्वरूपाणि यानि च\|\| |
| चिकित्सा | प्रमेह व्याधिची चिकित्सा |

| | |
|---|---|
| स्त्रोतस | **अस्थिवह स्त्रोतस** |
| मूल | अस्थिवहानां स्त्रोतसां मेदो मूलं जघनं च\| |
| कारण | व्यायामादतिसङ्क्षोभादस्थ्नामतिविघट्टनात्\|<br>अस्थिवाहीनि दुष्यन्ति वातलानां च सेवनात्\|\| |
| लक्षण | अध्यस्थिदन्तौ दन्तास्थिभेदशूलं विवर्णता\|<br>केशलोमनखश्मश्रुदोषाश्चास्थिप्रदोषजाः\|\| |
| चिकित्सा | पंचकर्म चिकित्सा (बस्ती विशेष चिकित्सा) |

| | |
|---|---|
| स्त्रोतस | **मज्जावह स्त्रोतस** |
| मूल | मज्जवहानां स्त्रोतसामस्थीनि मूलं सन्धयश्च\| |
| कारण | उत्पेषादत्यभिष्यन्दादभिघातात् प्रपीडनात्\|<br>मज्जवाहीनि दुष्यन्ति विरुद्धानां च सेवनात्\|\| |
| लक्षण | रुक् पर्वणां भ्रमो मूर्च्छा दर्शनं तमसस्तथा\|<br>अरुषां स्थूलमूलानां पर्वजानां च दर्शनम्\|\| |
| चिकित्सा | व्यवाय,व्यायाम व उचित काळी शोधन |

| | |
|---|---|
| स्त्रोतस | **शुक्रवह स्त्रोतस** |
| मूल | शुक्रवहानां स्त्रोतसां वृषणौ मूलं शेफश्च\| |
| कारण | अकालयोनिगमनान्निग्रहादतिमैथुनात्\|<br>शुक्रवाहीनि दुष्यन्ति शस्त्रक्षाराग्निभिस्तथा\|\| |
| लक्षण | शुक्रस्य दोषात् क्लैब्यमहर्षणम्\|<br>रोगि वा क्लीबमल्पायुर्विरूपं वा प्रजायते\|\|<br>न चास्य जायते गर्भः पतति प्रस्त्रवत्यपि\|<br>शुक्रं हि दुष्टं सापत्यं सदारं बाधते नरम्\|\| |
| चिकित्सा | वाजीकरण चिकित्सा |

| | |
|---|---|
| स्त्रोतस | **मुत्रवह स्त्रोतस** |
| मूल | मूत्रवहानां स्त्रोतसां बस्तिर्मूलं वङ्क्षणौ च\|\| |
| कारण | मूत्रितोदकभक्ष्यस्त्रीसेवनान्मूत्रनिग्रहात्\|<br>मूत्रवाहीनि दुष्यन्ति क्षीणस्याभिक्षतस्य च\|\| |
| लक्षण | प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा- अतिसृष्टमतिबद्धं प्रकुपितमल्पाल्पमभीक्ष्णं वा बहलं सशूलं मूत्रयन्तं दृष्ट्वा मूत्रवहान्यस्य स्त्रोतांसि प्रदुष्टानीति विद्यात्\| |
| चिकित्सा | मुत्रकृच्छ व्याधीची चिकित्सा |

| | |
|---|---|
| स्त्रोतस | **पुरीषवह स्त्रोतस** |
| मूल | पुरीषवहानां स्त्रोतसां पक्वाशयो मूलं स्थूलगुदं च\|\| |
| कारण | सन्धारणादत्यशनादजीर्णाध्यशनात्तथा\|<br>वर्चोवाहीनि दुष्यन्ति दुर्बलाग्नेः कृशस्य च\|\| |
| लक्षण | प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा- कृच्छ्रेणाल्पाल्पं सशब्दशूलमतिद्रवमतिग्रथितमतिबहु चोपविशन्तं दृष्ट्वा पुरीषवहान्यस्य स्त्रोतांसि प्रदुष्टानीति विद्यात्\| |
| चिकित्सा | अतिसार व्याधीची चिकित्सा |

| | |
|---|---|
| स्त्रोतस | **स्वेदवह स्त्रोतस** |
| मूल | स्वेदवहानां स्त्रोतसां मेदो मूलं लोमकूपाश्च॥ |
| कारण | व्यायामादतिसन्तापाच्छीतोष्णाक्रमसेवनात् ।<br>स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा॥ |
| लक्षण | प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा- अस्वेदनमतिस्वेदनं पारुष्यमतिश्लक्ष्णतामङ्गस्य परिदाहं लोमहर्षं च दृष्ट्वा स्वेदवहान्यस्य स्त्रोतांसि प्रदुष्टानीति विद्यात्॥ |
| चिकित्सा | ज्वर व्याधीची चिकित्सा |

## स्त्रोतोदुष्टी सामान्य हेतू :

आहारश्च विहारश्च यः स्याद्दोषगुणैः समः|

धातुभिर्विगुणश्चापि स्रोतसां स प्रदूषकः||

## स्त्रोतोदुष्टी सामान्य लक्षण :

अतिप्रवृत्तिः सङ्गो वा सिराणां ग्रन्थयोऽपि वा|

विमार्गगमनं चापि स्रोतसां दुष्टिलक्षणम्||

## स्त्रोतस स्वरूप :

स्वधातुसमवर्णानि वृत्तस्थूलान्यणूनि च|

स्रोतांसि दीर्घाण्याकृत्या प्रतानसदृशानि च||